क्षेपणम् २ पारी ३ दोहः ४ दोहनम् ५ । इति शब्दरत्नावली ।

दोहलः, पुं, (दोहमाकर्षं लातीति । ला + "आतो ऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) दोहदः । इच्छा । इति शब्दार्थकल्पतरुः ॥ (यथा, मालविकाग्निमित्रनाटके । ८ । ४७ ।
"अशोक ! यदि सद्य एव मुकुलैर्न सम्पत्स्यते
मुधा वहसि दोहलं ललितकामिसाधारणम् ॥")

दोहलवती, स्त्री, (दोहलोऽस्त्यस्या इति मतुप् । मस्य वः । ङीप् ।) दोहदवती । इति शब्दार्थकल्पतरुः ॥

दोहली, स्त्री, (दोहं लातीति । ला + कः । गौरादित्वात् ङीष् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (अशोकशब्देऽस्या विवरणं ज्ञेयम् ॥)

दोहापनय, पुं, (दोहं दोहनमपनयति स्वनिःसरणेनेति । अप + नी + अच ।) दुग्धम् । इति त्रिकाण्डशेषः ॥

दोहीयान्, [स्] त्रि, (अयमनयोरतिशयेन दोग्धा । "तुश्छन्दसि ।" ५ । ४ । ५९ । इति ईयसुन् । "तुरिष्ठेमेयःसु ।" ६।४।१५४ । इति तृशब्दस्य लोपः ।) अतिशयदोहकः ॥

दोह्यं, त्रि, (दुह्यते इति । दुह् + ण्यत् ।) दोहनीयम् । दुह्यम् । दोग्धव्यम् । इति व्याकरणम् ॥ (दुह्यतेऽस्या इति । गोमहिष्यादि । इति मिताक्षरा ॥ यथा, याज्ञवल्क्ये । २ । १८० ।
"दशैकपञ्चसप्ताहमासत्र्यहार्द्धमासिकम् ।
बीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम् ॥")

दौःसाधिकः, पुं, (दुर्दुरः साधः कर्म तत्र नियुक्तः । ठक् ।) द्वाःस्थितः । द्वारपालः । इति त्रिकाण्डशेषः ॥

दौकूलं, त्रि, (दुकूलेन परिवृतो रथ इति । "परिवृतो रथः ।" ४ । २ । १० । इति अण् ।) दुकूलेनावृतरथादि । इत्यमरटीकायां भरतः ॥

दौत्यं, क्ली, (दूतस्य भावः कर्म वा । ष्यञ् ।) दूतत्वम् । दूतस्य भावः । दूतस्य कर्म । इत्यमरटीकायां भरतः ॥ (यथा, हरिवंशे । १७२ । १८ ।
"दौत्यञ्च तत् कृतं घोरे विग्रहे जनमेजय ! ॥")

दौरात्म्य, क्ली, दुर्निन्दित आत्मा यत्नः धृतिः बुद्धिः स्वभावः शरीरं वा यस्य स दुरात्मा । तस्य भावकर्मार्थे ष्यप्रत्ययः । (ष्यञ् ।) दुरात्मनो भावः । दुरात्मनः कर्म । (यथा, महाभारते । २ । १५ । ७ ।
"शङ्किताः स्म महाभाग ! दौरात्म्यात् तस्य चानघ ! ॥")

दौर्गन्ध्यं, क्ली, (दुर्दुष्टो गन्धोऽस्य दुर्गन्धः । ततो भावे ष्यञ् ।) दुर्गन्धता । (यथा, महाभारते । ३ । २६० । १३ ।
" न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव वा ।")
तन्नाशकतैलं यथा,—
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीकक्कोलपूगानां लवङ्गस्य फलानि च ॥
अगुरुश्चीरकाश्मर्यः कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम् ॥
सरलः सप्तपर्णश्च लाक्षा चामलकी तथा ।
कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ॥"
इति गारुड़े १९८ अध्यायः ॥

दौर्गं, क्ली, दुर्गदेशिधर्मः । दुर्गसम्बन्धि । दुर्गस्य भावः दुर्गस्येदं वेत्यर्थे ष्यप्रत्ययः (ष्यञ्)॥

दौर्जन्यं, क्ली, दुर्जनस्य भाव इदं वेत्यर्थे ष्यप्रत्ययः (ष्यञ् ।) दुर्जनत्वम् । (यथा, महाभारते । ६ । १८ । ७६ ।
"तदिदं मम दौर्जन्यं बालिशस्य महीयसि ।
क्षन्तुमर्हति मातस्त्वं दिष्ट्या गर्भो मृतोत्थितः ॥")

दौर्बल्यं, क्ली, दुर्बलस्य भाव इत्यर्थे ष्यप्रत्ययः (ष्यञ्)। दुर्बलता । अबलवत्त्वम् । (यथा, मनुः । ८ । १७१ ।
"अनादेयस्य चादानादादेयस्य च विवर्जनात् ।
दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्येह च नश्यति ॥")

दौर्भागिनेयः, पुं, (दुर्भगाया अपत्यं पुमान् । दुर्भगा + "कल्याण्यादीनामिनङ् च ।" ४ । १ । १२६ । इति ढक् इनङादेशश्च ।) दुर्भगापुत्रः । इति शब्दरत्नावली ॥ दुर्भगायाः कन्या दौर्भागिनेयी ॥

दौर्भाग्यं, क्ली, दुर्भगस्य दुर्भगाया वा भावः । (ष्यञ् । "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ।" ७ । ३ । १९ । इत्युभयपदवृद्धिः ।) दुर्भगत्वम् । यथा, ज्योतिस्तत्त्वे ।
"शुक्रा पितृगृहे नारी भुङ्क्ते स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः शपन्ति कुलदेवताः ॥"
दुर्भाग्यमेव दौर्भाग्यम् । इति स्वार्थे ष्यप्रत्ययः ॥

दौर्मनस्यं, क्ली, दुर्मनसो भावः (ष्यञ्)। दुःखनिबन्धनचित्तावसादः । इति चण्डीटीकायां नागोजीभट्टः ॥ (यथा, मार्कण्डेये । ८१ । २६ ।
"तेषां कृते मे निःश्वासा दौर्मनस्यञ्च जायते ॥")

दौर्वं, क्ली, (दूर्वाया इदम् । दूर्वा + अण् ।) हरिद्वर्णम् । दूर्वारसः । इति मेदिनी । वे,५३ ॥

दौर्हृदं, क्ली, (दुर्हृदो भावः । युवादित्वात् अण् । बाहुलकात् न द्विपदवृद्धिः ।) इच्छा । दोहदम् । इति हेमचन्द्रः ।३।२०५॥("श्रद्धदौर्हृदा हि वीर्यवन्तं चिरायुषञ्च पुत्रं जनयति ।" इति सुश्रुते ॥ दूषितहृदयत्वम् । यथा, महाभारते । ५ । २९ । १४ ।
"दुर्भाषिणो मन्युवशानुगस्य
कामात्मनो दौर्हृदे भावितस्य ॥")

दौलेयः, पुं, (दुलेरपत्यमिति । "इतश्चानिञः ।" ४ । १ । १२२ । इति ढक् ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१५ ॥

दौल्मिः, पुं, (दुल्मस्यापत्यम् । दुल्म + इञ् ।) इन्द्रः । इति शब्दार्थकल्पतरुः ॥

दौवारिकः, पुं, (द्वारि नियुक्तः । "तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् । ततः "द्वारादीनाञ्च ।" ७ । ३ । ४ । इति न वृद्धिः ऐच् आगमश्च ।) द्वाररक्षकः । (यथा, राजतरङ्गिण्याम् ।५।१२८।
"राजदौवारिकः श्रीमाञ्छूरस्यासीन्महोदयः ॥")
तत्पर्य्यायः । द्वाःस्थः २ क्षत्ता ३ दण्डी ४ वेत्रधरः ५ । इति हलायुधः ॥ प्रतीहारः ६ प्रतिहारः ७ दर्शकः ८ द्वारी ९ वेतालः १० द्वारपालकः ११ दौःसाधिकः १२ वर्त्तरूढ़ः १३ गर्व्वाटः १४ दण्डपांशुलः १५ । इति शब्दरत्नावली ॥ द्वाःस्थितः १६ वेत्रधारकः १७ दर्शरूकः १८ दण्डवासी १९ । इति त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—
"प्रांशुः सुरूपो दक्षश्च प्रियवादी न चोद्धतः ।
चित्तग्राहश्च सर्व्वेषां प्रतीहारो वि"धीयते ॥"
इति मत्स्यपुराणम् ॥
"इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी सदा दक्षः प्रतीहारः स उच्यते ॥"
इति चाणक्यम् । १०८ ॥

दौष्कुलेयः, त्रि, (दुष्कुलस्यापत्यम् । "दुष्कुलात् ढक् ।" ४ । १ । १४२ । इति ढक् ।) दुष्कुलोद्भवः । निन्दितवंशजातः । दुष्कुलशब्दात् भवार्थे वा खेयप्रत्ययः ॥ (यथा, महाभारते । ३ । १९३ । २३ ।
"कुले जाताश्च क्षीयन्ते दौष्कुलेयवशानुगाः ॥")

दौष्मन्तिः, पुं, (दुष्मन्तस्यापत्यं पुमान् । दुष्मन्त + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) दुष्मन्तराजपुत्रः । स तु भरतराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।१।७४।२।
"रूपौदार्य्यगुणोपेतं दौष्मन्तिं जनमेजय ! ॥")

दौहित्रः, पुं,स्त्री, (दुहितृ + "अनृष्यानन्तर्य्ये बिदादिभ्योऽञ् ।" ४ । १ । १०४ । इति अञ् ।) दुहितुरपत्यम् । इति हेमचन्द्रः । ३ । २०८ ॥ तत्पर्य्यायः । कुतुपः २ । इति शब्दरत्नावली ॥
"त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपस्तिलाः ।
दौहित्रं खड्गमित्याहुरपत्यं दुहितुश्च यः ॥
कपिलाया घृतञ्चैव दौहित्रमिति चोच्यते ॥"
इति मार्कण्डेयपुराणम् ॥
"पौत्रदौहित्रयोर्लोके विशेषो नास्ति कश्चन ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इति दायभागः ॥
दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवदिति मनुः ॥ तदुत्पत्तौ कन्यागृहे पितुर्भोजने दोषाभावो यथा,—
"कन्यायां ब्रह्मदेयायामभुञ्जन् सुखमश्नुते ।
अथ भुङ्क्ते यो मोहात् भुक्त्वा स नरकं व्रजेत् ॥
अप्रजायाश्च कन्यायां न भुञ्जीयात् कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महासत्त्वसमाकीर्णात् नास्ति ते नरकाद्भयम् ।
तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ।
दौहित्रस्य तु दानेन नन्दन्ति पितरः सदा ॥
यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते ॥
मातुः पितुश्च विज्ञेयं तच्छुभस्याभिगामिनः ।
मातुः पितुर्हिरण्यस्य दौहित्रोऽर्हनवाप्नुते ॥"
इत्याद्ये वह्निपुराणे कन्यादाननामाध्यायः ॥